## अव्ययसर्वनाम्नामकच् प्राक् टेः। (७१/२०२६)

'तिङश्च' (५.३.५६/२००२) [1]इत्येव। अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेषु अकच् प्रत्ययो भवति, स च प्राक् टेः, न [2]परतः। [3]कस्यापवादः। उच्चकैः। नीचकैः। [4]शनकैः। सर्वनाम्नः खल्वपि – [5]सर्वके। विश्वके। उभयके। प्रातिपदिकात्, सुपः इति द्वयमपीहानुवर्तते। तत्राभिधानतो व्यवस्था [6]भवति। क्वचित् प्रातिपदिकस्य प्राक् टेः प्रत्ययो भवति, क्वचित् सुबन्तस्य। युष्मकाभिः, अस्मकाभिः, युष्मकासु, अस्मकासु, युवकयोः, आवकयोः इत्यत्र प्रातिपदिकस्य। त्वयका, मयका, त्वयकि, मयकि इत्यत्र सुबन्तस्य।

[६११] अकच्प्रकरणे तूष्णीमः काम्प्रत्ययो वक्तव्यः। (म.भा. २. ४२२)

स च मित्त्वादन्त्यात्[7]अचः परो भवति। [8]तूष्णीकामास्ते। तूष्णीकां तिष्ठति।

[६१२] शीले को मलोपश्च [9]वक्तव्यः। (म.भा. २. ४२३)

तूष्णींशीलः तूष्णीकः।

'तिङश्च' (५.३.५६/२००२) इति प्रकृतमत्र सम्बध्यते। पचतकि। जल्पतकि॥

## कस्य च दः। (७२/२०२७)

ककारान्तस्य प्रातिपदिकस्य[10]अकच्सन्नियोगेन दकारादेशो भवति। चकारः [11]सन्नियोगार्थः। सामर्थ्याच्चाव्ययग्रहणमनुवर्तते, न सर्वनामग्रहणम्। ककारान्तस्य सर्वनाम्नो[12]ऽसम्भवात्। धिक् – धकित्। हिरुक् – हिरकुत्। पृथक् – पृथकत्॥

## अज्ञाते। (७३/२०२८)

अज्ञातविशेषः अज्ञातः। अज्ञातत्वोपाधिकेऽर्थे वर्तमानात् [13]प्रातिपदिकात् तिङन्ताच्च स्वार्थे यथाविहितं प्रत्ययो भवति। स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत्। [14]कस्यायमश्वः इति स्वस्वामिसम्बन्धेनाज्ञाते अश्वे प्रत्ययः, अश्वकः। गर्दभकः। उष्ट्रकः। एवमन्यत्रापि यथायोगम् [15]अज्ञातता विज्ञेया। उच्चकैः। नीचकैः। [16]सर्वके। विश्वके। पचतकि। जल्पतकि॥

---

1. इति फ.ह, प्रकृतमनुवर्तते क. 2. परः क.फ. 3. कस्यायमपवादः क. 4. शनकैः नास्ति क. ह. 5. सर्वकः विश्वकः उभयकः क.ड. 6. भवति नास्ति क.ह. 7. अचः नास्ति फ. 8. तूष्णीमास्ते। तूष्णीकामास्ते। मकारो देशविध्यर्थः ह. 9. वक्तव्यः नास्ति फ. 10. अकच्नियोगेन ह. 11. सहयोगार्थः 12. अभावः ह. 13. ङ्याप् इत्यधिकम् ड. 14. वाक्यमिदं नास्ति क. 15. अज्ञातत्वं ज्ञेयम् क, अज्ञातता विज्ञायते ग. 16. सर्वकैः विश्वकैः ह.